# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (२०)

१५.११.२०११

# पुनरावर्तनम्

- युष्मद्-अस्मद्
- सु - मपर्यन्तस्य त्व-अह आदेशः, शेषे लोपः, प्रत्ययस्य अमादेशः
- औ - मपर्यन्तस्य युव-आव आदेशः, अन्त्यस्य आत्वम्, प्रत्ययस्य अमादेशः
- जस् - मपर्यन्तस्य यूय-वय आदेशः, शेषे लोपः, प्रत्ययस्य अमादेशः

- इह शेषे लोपोऽन्त्यलोप इति पक्षे जसः शी इति प्राप्ते,
- यूयद्   अम्
- यूय     अम्  ('शेषे लोपः')
  - अदन्तत्वात् 'जसः शी' (७.१.१७) - अदन्तात् सर्वनाम्नः परस्य औङः शी स्यात् - इति प्राप्नोति ।
  - स च परत्वात्, 'वार्णादाङ्गं बलीयः' (प) इति परिभाषया च 'अमि पूर्वः' (६.१.१०७) इति पूर्वरूपं बाधते ।

- ‘अङ्गकार्ये कृते पुनर्नाङ्गकार्यम्’ (प ९३) इति न भवति ।
- अङ्गाधिकारविहिते कार्ये सति पुनः अङ्गाधिकारविहितं कार्यं न भवति इत्यर्थः ।
- प्रकृते शेषलोपस्य आङ्गस्य प्रवृत्तत्वाद् आङ्गः शीभावो न भवतीति भावः ।
- ननु अङ्गकार्ये इति परिभाषा नात्र प्रवर्तते ।
- शीभावस्य अङ्गाधिकारविहितत्वेऽपि अङ्गाधिकरणत्वाभावात् ।
- ‘अङ्गवृत्ते पुनर्वृत्तावविधि’ इति परिभाषास्वारस्येन तथैव प्रतीयते ।
- अतः अत्र शीभावो दुर्वार इति अस्वरसाद् आह,

- ‘ङेप्रथमयोरम्’ इत्यत्र मकारान्तरं प्रश्लिष्य ‘अम् मान्त एवावशिष्यते, न तु विक्रियते’ इति व्याख्यानाद्वा ।
- ‘ङेप्रथमयोरम्’ इत्यत्र अम् म् इति मकारान्तरं प्रश्लिष्यते । अन्त्यो मकारः संयोगान्तलोपेन लुप्तः ।

- वस्तुतस्तु मकारान्तरप्रश्लेषो भाष्ये अदर्शनाद् उपेक्ष्यः ।
- सन्निपातपरिभाषयैव अत्र शीभावो न भवति ।
- दकारस्य शेषलोपः विभक्ति-युष्मदस्मदोः सन्निपातम् आश्रित्य प्रवृत्तः ।
- शीभावे आद्गुणे च कृते यदि यूये वये इति रूपं स्यात्, तर्हि सन्निपातभङ्गः ।
- एकादेशस्य गुणस्य पूर्वान्तवद्भावे प्रकृत्यनुप्रवेशात् प्रत्ययसन्निपातभङ्गः ।
- परादित्वे तु युष्मदस्मत्सन्निपातविरोधः इत्यलम् ।

# ३८९. त्वमावेकवचने (७.२.९७)

- पदद्वयम् । त्व-मौ, एकवचने ।
- 'अष्टन आ विभक्तौ' (७.२.८४) इत्यतः 'विभक्तौ' इति, 'युष्मदस्मदोरनादेशे' (७.२.८६) इत्यतः 'युष्मदस्मदोः' इति च अनुवर्तते । 'मपर्यन्तस्य' (७.२.९१) इति अधिक्रियते ।
- एकस्योक्तौ युष्मदस्मदोः मपर्यन्तस्य त्वमौ स्तः विभक्तौ ।

- युष्मद् अम् — अस्मद् अम्
- युष्मद् अम् (ङेप्रथमयोरम्) अस्मद् अम्
- त्व अद् अम् ('त्वमावेकवचने') म अद् अम्

# ३९०. द्वितीयायाञ्च (७.२.८७)

- पदद्वयम् । द्वितीयायाम्, च ।
- ‘अष्टन आ विभक्तौ’ (७.२.८४) इत्यतः ‘आ’ इति, ‘युष्मदस्मदोरनादेशे’ (७.२.८६) इत्यतः ‘युष्मदस्मदोः’ इति च अनुवर्तते ।
- युष्मदस्मदोः आकारः स्यात् ।

| | | |
|---|---|---|
| त्व अद् अम् | | म अद् अम् |
| त्व अ आ अम् | (‘द्‌वितीयायां च’) | म अ आ अम् |
| त्व आ अम् | (‘अतो गुणे’) | म आ अम् |
| त्वा अम् | (‘अकः सवर्णे दीर्घः’) | मा अम् |
| त्वाम् | (‘अमि पूर्वः’) | माम् |

- युष्मद् औ                                   अस्मद् औ
- युष्मद् अम्(‘ङेप्रथमयोरम्’)                 अस्मद् अम्
- युव अद् अम्        (‘युवावौ द्विवचने’)         आव अद् अम्
- युव अआ अम् (‘द्वितीयायां च’) आव अ आ अम्
- युव आ अम् (‘अतो गुणे’)              आव आ अम्
- युवा अम् (‘अकः सवर्णे दीर्घ’) आवा अम्
- युवाम्          (‘अमि पूर्वः’)          आवाम्

# ३९१. शसो न (७.१.२९)

- पदद्वयम् । शसः, न ।
- 'युष्मदस्मद्भ्यां ङसोऽश्' (७.१.२७) इत्यतः 'युष्मदस्मद्भ्याम्' इति अनुवर्तते ।
- न इति अविभक्तिकं पदम् ।
- युष्मदस्मद्भ्यां परस्य शसः नकारः स्यात् ।
- अमोऽपवादः ।
- 'आदेः परस्य', 'संयोगान्तस्य लोपः' ।
- युष्मान्, अस्मान् ।

- युष्मद्   (शस्)  अस्                            अस्मद्  (शस्) अस्
- युष्मद्     न्  स् (‘शसो न’)                  अस्मद्          न्  स्
- युष्म आ  न्  स्       (‘द्वितीयायां च’)                    अस्म आ न्   स्
- युष्मान्       स्         (‘अकः सवर्णे दीर्घः’)      अस्मान्        स्
- युष्मान्        (‘संयोगान्तस्य लोपः’) अस्मान्